শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীৱল্লভাচার্য ৱিরচিতম্

# ॥শ্রীনন্দকুমারাষ্টকম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ

শ্ৰীমতে ৰামানুজায নমঃ

# ॥শ্ৰীনন্দকুমাৰাষ্টকম্ ॥

সুন্দৰগোপালং উৰৱনমালং নযনৱিশালং দুঃখহৰং
    ৱৃন্দাৱনচন্দ্ৰং আনন্দকন্দং পৰমানন্দং ধৰণিধৰম্।
ৱল্লভঘনশ্যামং পূৰ্ণকামং অত্যভিৰামং প্ৰীতিকৰং
    ভজ নন্দকুমাৰং সৰ্ৱসুখসাৰং তত্ত্বৱিচাৰং ব্ৰহ্মপৰম্॥ ১ ॥

সুন্দৰৱাৰিজৱদনং নিৰ্জিতমদনং আনন্দসদনং মুকুটধৰং
    গুঞ্জাকৃতিহাৰং ৱিপিনৱিহাৰং পৰমোদাৰং চীৰহৰম্।
ৱল্লভপটপীতং কৃতউপৱীতং কৰনৱনীতং ৱিবুধৱৰং
    ভজ নন্দকুমাৰং সৰ্ৱসুখসাৰং তত্ত্বৱিচাৰং ব্ৰহ্মপৰম্॥ ২ ॥

শোভিতমুখধূলং যমুনাকূলং নিপটঅতূলং সুখদতৰং
    মুখমণ্ডিতৰেণুং চাৰিতধেনুং ৱাদিতৱেণুং মধুৰসুৰম্।
ৱল্লভমতিৱিমলং শুভপদকমলং নখৰুচি অমলং তিমিৰহৰং
    ভজ নন্দকুমাৰং সৰ্ৱসুখসাৰং তত্ত্বৱিচাৰং ব্ৰহ্মপৰম্॥ ৩ ॥

শিৰমুকুটসুদেশং কুঞ্চিতকেশং নটৱৰৱেশং কামৱৰং
    মাযাকৃতমনুজং হলধৰঅনুজং প্ৰতিহতদনুজং ভাৰহৰম্।
ৱল্লভব্ৰজপালং সুভগসুচালং হিতমনুকালং ভাৱৱৰং
    ভজ নন্দকুমাৰং সৰ্ৱসুখসাৰং তত্ত্বৱিচাৰং ব্ৰহ্মপৰম্॥ ৪ ॥

ইন্দীৱৰভাসং প্ৰকটসুৰাসং কুসুমৱিকাসং ৱংশিধৰং
    হৃতমন্মথমানং ৰূপনিধানং কৃতকলগানং চিত্তহৰম্।
ৱল্লভমৃদুহাসং কুঞ্জনিৱাসং ৱিৱিধৱিলাসং কেলিকৰং
    ভজ নন্দকুমাৰং সৰ্ৱসুখসাৰং তত্ত্বৱিচাৰং ব্ৰহ্মপৰম্॥ ৫ ॥

অতিপৰপ্ৰৱীণং পালিতদীনং ভক্তাধীনং কৰ্মকৰং
    মোহনমতিধীৰং ফণিবলৱীৰং হতপৰৱীৰং তৰলতৰম্।
ৱল্লভব্ৰজৰমণং ৱাৰিজৱদনং হলধৰশমনং শৈলধৰং
    ভজ নন্দকুমাৰং সৰ্ৱসুখসাৰং তত্ত্বৱিচাৰং ব্ৰহ্মপৰম্॥ ৬ ॥

www.prapatti.com

জলধরদ্যুতিঅঙ্গং ললিতত্রিভঙ্গং বহুকৃতরঙ্গং রসিকৱরং
গোকুলপরিৱারং মদনাকারং কুঞ্জৱিহারং গূঢতরম্।
ৱল্লভব্রজচন্দ্রং সুভগসুছন্দং কৃতআনন্দং ভ্রান্তিহরং
ভজ নন্দকুমারং সর্ৱসুখসারং তত্ত্ৱৱিচারং ব্রহ্মপরম্॥ ৭ ॥

ৱন্দিতযুগচরণং পাৱনকরণং জগদুদ্ধরণং ৱিমলধরং
কালিযশিরগমনং কৃতফণিনমনং ঘাতিতযমনং মৃদুলতরম্।
ৱল্লভদুঃখহরণং নির্মলচরণং অশরণশরণং মুক্তিকরং
ভজ নন্দকুমারং সর্ৱসুখসারং তত্ত্ৱৱিচারং ব্রহ্মপরম্॥ ৮ ॥

॥ ইতি শ্রীনন্দকুমারাষ্টকং সংপূর্ণম্ ॥

www.prapatti.com